अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 102**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2017**

**एम.ए. संस्कृतम्, (सत्रम् : प्रथमम्)**
**व्याकरणं भाषाविज्ञानञ्च**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्ड–क
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः 'क' खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः।** **(3×15=45)**

1. भाषाविज्ञानस्य परिभाषाः तत्क्षेत्रञ्च सविशदं प्रतिपादयत।
2. भाषापरिवर्त्तनस्य कारणानि सविस्तरं विवेचयत।
3. अग्रलिखितानां रूपसिद्धिः कार्या सूत्रनिर्देशपुरस्सरम् – (3×5=15)
   रामाणाम्, मतीः, राज्ञाम्।
4. अग्रलिखितानां रूपाणां सिद्धिः कार्या – (3×5=15)
   भवेयुः, अघसत्, भिन्नः
5. अग्रलिखितानां सूत्राणां व्याख्या कार्या – (3×5=15)
   वृद्धिरेचि, तुल्यास्यप्रयत्नं सवर्णम्, एङि पररूपम्, बहुवचने झल्येत्, मिदचोऽन्त्यात्परः।

## खण्ड–ख
**(लघूत्तरीयप्रश्नाः)**

**निर्देशः 'ख' खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः।** **(4×5=20)**

1. भाषाणाम् आकृतिमूलकं वर्गीकरणं विवेचनीयम्।
2. भाषायाः परिभाषां वैशिष्ट्यञ्च वर्णयत।
3. अग्रलिखिते रूपे साधनीये – हरये, रमायाः । $(2\times2\frac{1}{2}=5)$
4. अग्रलिखितयोः सिद्धिः कार्या – भवानि, सन्तु । $(2\times2\frac{1}{2}=5)$
5. अग्रलिखिते सूत्रे व्याख्येये – भवतेरः, हलोऽनन्तराः संयोगः । $(2\times2\frac{1}{2}=5)$
6. अग्रलिखिते सूत्रे व्याख्येये – वाह ऊठ्, असिद्धवदत्राऽभात् ।

## खण्ड-ग
## (वस्तुनिष्ठप्रश्नाः)

निर्देशः 'ग' खण्डे वस्तुनिष्ठप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । (10×0.5=05)

1. धात्रंशः अस्मिन् शब्दे कतमः सन्धिः?
   (अ) यण्सन्धिः (ब) अयादिसन्धिः
   (स) दीर्घसन्धिः (द) पररूपसन्धिः
2. एतन्मुरारिः अत्र केन सूत्रेण तकारस्य नकारादेशः ?
   (अ) झलां जशोऽन्ते (ब) ष्टुना ष्टुः
   (स) स्तोः श्चुना श्चुः (द) यरोऽनुनासिकेऽनुनासिको वा
3. रामैः इत्यत्र भिस ऐस् केन सूत्रेण भवति ?
   (अ) अतो दीर्घात् भिस ऐस् (ब) अदन्तात् भिस ऐन्
   (स) अतो भिस ऐस् (द) रामाद् भिस ऐस्
4. पथिन् शब्दस्य पञ्चम्येकवचने किं रूपम् ?
   (अ) पथात् (ब) पथः
   (स) पन्थः (द) पन्थात्
5. बभूव अस्मिन् शब्दे द्वित्वं केन सूत्रेण भवति ?
   (अ) सन्यङोः (ब) श्लौ
   (स) लिटि धातोरनभ्यासस्य (द) चङि
6. अत्तात् कस्य लकारस्य रूपम् ?
   (अ) लङ् (ब) लोट्
   (स) लुङ् (द) विधिलिङ्
7. सार्वधातुकमपित् सूत्रं किं कार्यं करोति ?
   (अ) कित्वत् (ब) वृद्धिनिषेधम्
   (स) णित्वत् (द) ङित्वत्
8. भवतु इत्यत्र केन सूत्रेण उकारादेशो भवति ?
   (अ) एरुः (ब) भवतेरः
   (स) भवतेरुः वक्तव्यः (द) एतेरुः
9. हन् धातोः प्रथमपुरुषबहुवचनस्य किं रूपम् ?
   (अ) हन्ति (ब) हृनन्ति
   (स) घ्नन्ति (द) घनन्ति
10. शतृशानचोः प्रत्यययोः का संज्ञा ?
   (अ) सत् (ब) शत्
   (स) वसुः (द) असत्

--------------x--------------